शश (शीघ्रगामी), शशाङ्क (चन्द्रमा) तथा शमन (यमराज) हैं। सर्दी - गर्मी, क्षुधा, वृद्धावस्था तथा मानसिक चिन्ता को दूर करनेवाले भी आप ही हैं। आप ही आधि-व्याधि तथा उसे दूर करनेवाले हैं ।८८।

मम यज्ञमृगव्याधो व्याधीनामागमो गमः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकथनालयः ।८९।

मेरे यज्ञरूपी मृगके वधिक तथा व्याधियों को लाने और मिटानेवाले भी आप ही हैं। (कृष्णरूप में) मस्तक पर शिखण्ड (मोरपङ्ख) धारण करने के कारण आप शिखण्डी हैं। आप कमल के समान नेत्रोंवाले, कमल के वनमें निवास करनेवाले हैं।८९।

दण्डधारस्त्र्यम्बकश्च उग्रदण्डोऽण्डनाशनः ।
विषाग्निपाः सुरश्रेष्ठः सोमपास्त्व मरुत्पतिः ।९०।

आप ही दण्ड धारण करनेवाले, त्र्यम्बक, उग्रदण्ड और ब्रह्माण्ड के संहारक है। विषाग्नि को पी जानेवाले, देवश्रेष्ठ, सोमरस का पान करनेवाले, और मरुद्गणों के स्वामी हैं।

अमृतपास्त्वं जगनाथ देवदेव गणेश्वरः ।
विषाग्निपा मृत्युपाश्च क्षीरपाः सोमपास्तथा ।
मधुश्च्युतानामग्रपास्त्वमेव तुषिताद्यपाः ।९१।

देवाधिदेव ! जगन्नाथ ! आप अमृत पान करनेवाले और गणों के स्वामी हैं। विषाग्नि तथा मृत्युसे रक्षा करनेवाले और दूध एवं सोमरस का पान करनेवाले हैं। आप सुखसे भ्रष्ट हुए जीवों के प्रधान रक्षक तथा तुषितनामक देवताओं के आविर्भूत ब्रह्माजी का भी पालन करनेवाले हैं ।९१।

हिरण्यरेताः पुरुषस्त्वमेव
त्वं स्त्री पुमांस्त्वं च नपुंसकं च।
बालो युवा स्थविरो जीर्णदंष्ट्रस्त्वं
नागेन्द्र शाकस्त्वं विश्वकृद्विश्वकर्ता ।९२।

आप ही हिरण्यरेता (अग्नि), पुरुष (अन्तर्यामी) तथा आप ही स्त्री, पुरुष और नपुंसक हैं। बालक-युवा और वृद्ध भी आप ही हैं। नागेश्वर ! आप जीर्ण दाढ़ोंवाले और इन्द्र हैं। आप विश्वकृत (जगत् के संहारक), विश्वकर्ता (प्रजापति) हैं ।९२।

विश्वकृत् विश्वकृतां वरेण्यस्त्वं विश्ववाहो ।
विश्वरूपस्तेजस्वी विश्वतोमुखः ।
चन्दादित्यौ चक्षुषी ते हृदयं च पितामहः ।९३।

विश्वकृत (ब्रह्माजी), विश्वकी रचना करनेवाले प्रजापतियों में श्रेष्ठ, विश्वका भार वहन करनेवाले, विश्वरूप, तेजस्वी और सब ओर मुखवाले हैं। चन्द्रमा और सूर्य आपके नेत्र तथा पितामह ब्रह्मा आपके हृदय हैं ।९३।

महोदधिः सरस्वती वाग् बलमनलोऽ-
निलः अहोरात्रं निमेषोन्मेषकर्म ।९४।

आप ही समुद्र हैं, सरस्वती आपकी वाणी हैं, अग्नि और वायु बल हैं तथा आपके नेत्रोंका खुलना और बन्द होना ही दिन और रात्रि हैं ।९४।

न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ९५।

शिव ! आपके माहात्म्यको ठीक-ठीक जानने में ब्रह्मा, विष्णु तथा प्राचीन ऋषि भी समर्थ नहीं हैं ।९५।

या मूर्तयः सुसूक्ष्मास्ते न मह्यं यान्ति दर्शनम् ।
त्राहि मां सतत रक्ष पिता पुत्रमिवौरसम् ।९६।

आपके जो सूक्ष्म रूप हैं, वे हमलोगों की दृष्टि में नहीं आते। भगवान् ! जैसे पिता अपने औरस पुत्रकी रक्षा करता है, उसी तरह आप सर्वदा मेरी रक्षा करें ।९६।

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि ।९७।

अनघ ! मैं आपके द्वारा रक्षित होने योग्य हूं, आप अवश्य मेरी रक्षा करें, मैं आपको नमस्कार करता हूं। आप भक्तों पर दया करनेवाले भगवान हैं और मैं सदा के लिये आपका भक्त हूं ।९७।

यः सहस्राण्यनेकानि पुंसामावृत्य दुर्दृशः ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्तास्तु नित्यश ।९८।

जो हजारों मनुष्यों पर माया का परदा डालकर सब के लिये दुर्बोध हो रहे हैं अद्वितीय हैं तथा समुद्र के समान कामनाओं का अन्त होने पर प्रकाश में आते हैं, वे परमेश्वर नित्य मेरी रक्षा करें ।९८।

यं विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ।९९।

जो निद्राके वशीभूत न होकर प्राणों पर विजय पा चुके हैं और इन्द्रियों को जीतकर सत्त्वगुण में स्थित हैं, ऐसे योगीलोग ध्यान में जिस ज्योतिर्मय तत्त्व का साक्षात्कार करते हैं, उस योगात्मा परमेश्वर को नमस्कार है ।९९।

जटिले दण्डिने नित्यं लम्बोदरशरीरिणे ।
कमण्डलुनिषङ्गाय तस्मै ब्रह्मात्मने नमः ।१००।

जो सदा जटा और दण्ड धारण किये रहते हैं, जिनका उदर और शरीर विशाल है तथा ककण्डलु ही जिनके लिये तरकस का काम देता है, ऐसे ब्रह्माजी के रूप में विराजमान भगवान् शिव

को प्रणाम है ।१००।

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसंधिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ।१०१।

जिनके केशों में बादल, शरीर की संधियों में नदियों और उदरमें चारों समुद्र हैं, उन जलस्वरूप परमात्माको नमस्कार है ।१०१

सम्भक्ष्य सर्वभूतानि युगान्ते पर्युपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुदायिनम् ।१०२।

जो प्रलयकाल उपस्थित होने पर सब प्राणियों का संहार करके एकार्णव के जल में शयन करते हैं, उन जलशायी भगवान् की मैं शरण लेता हूं ।१०२।

प्रविश्य वदनं राहोर्यः सोमं पिबते निशि ।
ग्रसत्यर्कं च स्वर्भानुर्भूत्वा मां सोऽभिरक्षतु ।१०३।

जो रात में राहु के मुख में प्रवेश करके स्वयं चन्द्रमा के अमृत का पान करते हैं तथा स्वयं ही राहु बनकर सूर्य पर ग्रहण लगाते हैं, वे परमात्मा मेरी रक्षा करें ।१०३।

ये चानुपतिता गर्भा यथा भागानुपासते ।
नमस्तेभ्यःस्वधा स्वाहा प्राप्नुवन्तु मुदन्तु ते ।१०४।

ब्रह्मा जी के बाद उत्पन्न होने वाले जो देवता और पितर बालक की भांति यज्ञ में अपने-अपने भाग ग्रहण करते हैं, उन्हें नमस्कार है। वे 'स्वाहा और स्वधा' के द्वारा अपने भाग प्राप्त करके प्रसन्न हों ।१०४।

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् ।
रक्षन्तु ते हि मां नित्यं-नित्यं चाप्याययन्तु माम् ।१०५।

जो अङ्गुष्ठमात्र जीवके रूप में सम्पूर्ण देहधारियों के भीत विराजमान हैं, वे सदा मेरी रक्षा और वृद्धि करें ।१०५।

ये न रोदन्ति देहस्था देहिनो रोदयन्ति च ।
हर्षयन्ति न हृष्यन्ति नमस्तेभ्योऽस्तु नित्यशः ।१०६।

जो देह के भीतर रहते हुए स्वयं न रोकर देहधारियों को ही रुलाते हैं, स्वयं हर्षित न होकर उन्हें ही हर्षित करते हैं, उन सब रुद्रों को मैं नित्य नमस्कार करता हूं ।१०६।

ये नदीषु समुद्रेषु पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ।१०७।

नदी, समुद्र, पर्वत, गुहा, वृक्षो की जड़, गोशाला, दुर्ग, पथ घनेवन ।१०७।

चतुष्पथेषु रथ्यासु चत्वरेषु तटेषु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ।१०८।

चौराहे, सड़क, चबूतरे, किनारे, हस्तिशाला, अश्वशाला, रथशाला, पुराने बगीचे, जीर्ण गृह ।१०८।

येषु पञ्चसु भूतेषु दिशासु विदिशासु च ।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ।१०९।

पञ्चभूत, दिशा, विदिशा, चन्द्रमासूर्य तथा उन-उनकी किरणों में ।१०९।

रसातलगता ये च ये च तस्मै परं गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्योऽस्तुनित्यशः ।११०।

रसातल में और उससे भिन्न स्थानों में भी जो अधिष्ठातृ देवता के रूप में व्याप्त हैं, उन सबको सदा नमस्कार है, नमस्कार है, नमस्कार है ।११०।

येषां न विद्यते संख्या प्रमाणं रूपमेव च ।
असंख्येयगुणा रुद्रा नमस्तेभ्योऽस्तु नित्यशः ।१११।

जिनकी सख्या, प्रमाण और रूपकी सीमा नहीं है, जिनके गुणोंकी गिनती नहीं हो सकती. उन रुद्रों को मैं सदा नमस्कार करता हूं ।१११।

सर्वभूतकरो यस्मात् सर्वभूतपतिर्हरः ।
सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ।११२।

आप सम्पूर्ण भूतों के जन्मदाता, सबके पालक और संहारक हैं तथा आप ही समस्त प्राणियों के अन्तरात्मा हैं, इसीलिये मैंने आपको पृथक् निमन्त्रण नहीं दिया ।११२।

त्वमेव होज्यसे यस्माद् यज्ञैर्विविधदक्षिणैः ।
त्वमेव कर्ता सर्वस्य तेन त्वं न निमन्त्रितः ।११३।

नाना प्रकारकी दक्षिणाओंवाले यज्ञों द्वारा आपही का जयन

किया जाता है और आप ही सबके कर्ता हैं, इसीलिये मैंने आपको अलग निमन्त्रण नहीं दिया ।११३।

अथवा मायया देव सूक्ष्मया तव मोहितः ।
एतस्मात् कारणाद् वापि तेन त्वं न निमन्त्रितः ।११४।

अथवा देव ! आपकी सूक्ष्म माया से मैं मोहमें पड़ गया था, इस कारण से भी मैंने आपको निमन्त्रण नहीं दिया ।११४।

प्रसीद मम भद्रं ते भव भावगतस्य मे ।
त्वयि मे हृदयं देव त्वयि बुद्धिर्मनस्त्वयि ।११५।

भगवन् भव ! आपका भला हो, मैं भक्तिभाव के साथ आपकी शरण में आया हूं, इसलिये अब मुझपर प्रसन्न होइये । मेरा हृदय, मेरी बुद्धि और मेरा मन सब आपमें समर्पित हैं ।११५।

स्तुत्वैवं स महादेवं विरराम प्रजापतिः ।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ।११६।

इस प्रकार महादेव जी की स्तुति करके प्रजापति दक्ष चुप हो गये। तब भगवान् शिव ने भी बहुत प्रसन्न होकर दक्षसे कहा।११६।

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत ।
बहुनात्र किमुक्तेन मत्समीपे भविष्यसि ।११७।

उत्तम व्रत का पालन करनेवाले दक्ष ! तुम्हारेद्वारा की हुई इस स्तुतिसे मैं बहुत संतुष्ट हूं। यहां अधिक क्या कहूं, तुम मेरे निकट निवास करोगे ।११७।

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
प्रजापते मत्प्रसादात् फलभागी भविष्यसि ।११८।

'प्रजापते ! मेरे प्रसाद से तुम्हें एक हजार अश्वमेध तथा एक सौ वाजपेय यज्ञका फल मिलेगा' ।११८।

अथैनमब्रवीद् वाक्यं लोकस्याधिपतिर्भवः ।
आश्वासनकरं वाक्यं वाक्यविद्वाक्य सम्मतम् ।११९।

तदनन्तर वाक्यविशारद, लोकनाथ भगवान् शिवने प्रजापति को सान्त्वना देनेवाला युक्तियुक्त एव उत्तम वचन कहा ।११९।

दक्ष-दक्ष न कर्तव्यो मन्युर्विश्वमिमं प्रति ।
अहं यज्ञहरस्तुभ्यं दृष्टमेतत् पुरातनम् ।१२०।

'दक्ष ! दक्ष ! इस यज्ञ में जो विघ्न डाला गया है, इसके लिये तुम खेद न करना। मैंने पहले कल्प में भी तुम्हारे यज्ञ का विध्वंस किया था । यह घटना भी पूर्वकल्प के अनुसार ही हुई है ।१२०।

भूयश्च ते वरं दद्मि तं त्वं गृह्णीष्व सुव्रत ।
प्रसन्नवदनो भूत्वा तदिहैकमनाः शृणु ।१२१।

'सुव्रत ! मैं पुनः पुनः तुम्हें वरदान देता हूं, तुम इसे स्वीकार करो और प्रसन्नवदन तथा एकाग्रचित होकर यहां मेरी यह बातें सुनो १२।

वेदात् षडङ्गादुद्धृत्य सांख्ययोगाच्च युक्तितः ।
तपः सुतप्तं विपुलं दुश्चरं देवदानवैः ।१२२।

'पूर्वकाल में षडङ्ग वेद, सांख्ययोग और तर्क से निश्चत करके देवताओं और दानवों ने जिस विशाल एवं दुष्कर तपका अनुष्ठान किया था (उससे भी उत्तम व्रत मैं तुम्हें बता रहा हूं) ।१२२।

अपूर्वं सर्वतोभद्र सर्वतोमुखमव्ययम् ।
अब्दैर्दशाहसंयुक्तं गूढमप्राशनिन्दितम् ।१२३।

'दक्ष ! मैंने पूर्वकाल में एक शुभकारक पाशुपत नामक व्रत को प्रकट किया था, जो अपूर्व है, साधन और सिद्धि सभी अवस्थाओं में सब प्रकार से कल्याणकारी, सर्वतोमुखी (सभी वर्णों और आश्रमों के अनुकूल) तथा मोक्षका साधक होनेके कारण अविनाशी है। वर्षों तक पुण्यकर्म करने और यम-नियम नामक दस साधनों को अभ्यास में लाने से उसकी उपलब्धि होती है। वह गूढ़ है। मूर्ख मनुष्य उसकी निन्दा करते हैं ।१२३।

वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित्समम् ।
गतान्।रेध्यवसितमत्याश्रममिदं व्रतम् ।१२४।

यह समस्त वर्ण धर्म और आश्रम-धर्म के अनुकूल, सम और किसी-किसी अंश में विपरीत भी है। जिन्हें सिद्धान्त का ज्ञान है, उन्होंने इसे अपनाने का पूर्ण निश्चय कर लिया है। यह व्रत सभी आश्रमों से बढ़कर है ।१२४।

मया पाशुपतं दक्ष शुभमुत्पादितं पुरा ।
तस्य चीर्णस्य तत् सम्यक् फलं भवति पुष्कलम् ।
तच्चास्तु ते महाभाग त्यज्यतां मानसो ज्वरः १२५।

इसके अनुष्ठान से उत्तम एवं प्रचुर फल की प्राप्ति होती है। महाभाग ! उस पाशुपत व्रत के अनुष्ठान का फल तुम्हें प्राप्त हो। अब तुम अपनी मानसिक चिन्ता का परित्याग कर दो ।१२५।

एवमुक्त्वा महादेवः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः १२६।

दक्ष से ऐसा कहकर पत्नी और पार्षदों सहित अमित पराक्रमी महादेव जी वहीं अन्तर्धान हो गये ।१२६।

दक्षप्रोक्तं स्तवमिमं कीर्तयेद् यः शृणोति वा ।
नाशुभं प्राप्नुयात् किंचिद् दीर्घमायुरवाप्नुयात् ।१२७।

जो मनुष्य दक्ष के द्वारा कहे हुए इस स्तोत्र का कीर्तन अथवा श्रवण करेगा, उसे कोई अमङ्गल नहीं प्राप्त होगा। वह दीर्घ आयु प्राप्त करता है ।१२७।

यथा सर्वेषु देवेषु वरिष्ठो भगवाञ्छिवः ।
तथा स्तवो वरिष्ठोऽय स्तवानां ब्रह्मसम्मितः ।१२८।

जैसे भगवान् शिव सब देवताओं में श्रेष्ठ हैं, उसी प्रकार यह वेदतुल्य स्तोत्र सभी स्तुतियों में श्रेष्ठ है ।१२८।

यशोराज्यसुखैश्वर्यकामार्थधनकांक्षिभिः ।
श्रोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः ।१२९।

यश, राज्य, सुख, ऐश्वर्य, काम, अर्थ धन और विद्या की इच्छा रखनेवाले पुरुषों को भक्तिभाव का आश्रय लेकर यत्न

पूर्वक इस स्तोत्र का श्रवण करना चाहिये ।१२९।

व्याधितो दुःखितो दीनश्चोरग्रस्तो भयार्दितः ।
राजकार्याभियुक्तो वा मुच्यते महतो भयात् ।१३०।

रोगी, दुःखी, दीन, चोर के हाथ में पड़ा हुआ, भयभीत तथा राजकार्य का अपराधी मनुष्य भी इस स्तोत्रका पाठ करने से महान् भय से छुटकारा पा जाता है ।१३०।

अनेनैव तु देहेन गणानां समतां व्रजेत् ।
तेजसा यशसा चैव युक्तो भवति निर्मलः ।१३१।

इतना ही नहीं, वह इसी शरीर से भगवान् शिव के गणों की समानता प्राप्त कर लेता है तथा तेज और यश से सम्पन्न होकर निर्मल हो जाता है ।१३१।

न राक्षसाः पिशाचा वा न भूता न विनायकाः ।
विघ्नं कुर्युर्गृहे तस्य यत्रायं पठ्यते स्तवः ।१३२।

जिसके यहां इस स्तोत्र का पाठ होता है, उसके घर में राक्षस, पिशाच, भूत और विनायक कभी कोई विघ्न नहीं करते हैं ।१३२।

शृणुयाच्चैव या नारी तद्भक्ता ब्रह्मचारिणी ।
पितृपक्षे भर्तृपक्षे पूज्या भवति देववत् ।१३३।

जो नारी भगवान् शङ्कर में भक्तिभाव रखकर ब्रह्मचर्य का पालन करती हुई इस स्तोत्र को सुनती है वह पितृकुल और

पतिकुल में देवता के समान आदरणीय होती है ।१३३।

शृणुयाद्यः स्तवं कृत्स्नं कीर्तयेद्वा समाहितः ।
तस्य सर्वाणि कर्माणि सिद्धिं गच्छन्त्यभीक्ष्णशः ।१३४।

जो एकाग्रचित्त होकर इस सम्पूर्ण स्तोत्र को सुनता अथवा पढ़ता है, उसके सारे कार्य सदा ही सिद्ध होते रहते हैं ।१३४।

मनसा चिन्तितं यच्च यच्च वाचानुकीर्तितम् ।
सर्वं सम्पद्यते तस्य स्तवस्यास्यानुकीर्तनात् ।१३५।

वह मनसे जिस वस्तु के लिये चिन्तन करता है अथवा वाणी से जिस मनोरथ की याचना करता है, उसका वह सारा अभीष्ट इस स्तोत्र के बार-बार पाठ से सिद्ध हो जाता है ।१३५।

देवस्य च गुहस्यापि देव्या नन्दीश्वरस्य च ।
बलिं सुविहितं कृत्वा दमेन नियमेन च ।१३६।

मनुष्य को चाहिये कि यह इन्द्रियों को संयम में रख कर शौच-संतोष आदि नियमों का पालन करते हुए महादेव जी, कार्तिकेय, पार्वतीदेवी और नन्दिकेश्वर को विधिपूर्वक पूजोपहार समर्पित करे ।१३६।

ततस्तु युक्तो गृह्णीयान्नामान्याशु यथाक्रमम् ।
ईप्सितालंभते सोऽर्थान् भोगान् कामांश्च मानवः ।१३७।

फिर एकाग्रचित्त होकर क्रमशः इन सहस्र नामों का पाठ करे । ऐसा करने से मनुष्य शीघ्र ही मनोवाञ्छित पदार्थों, भोगों

और कामनाओं को प्राप्त कर लेता है ।१३७।

मृतश्च स्वर्गमाप्नोति तिर्यक्षु च न जायते ।
इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ।१३८।

तथा मृत्यु के पश्चात् स्वर्ग में जाता है । उसे पशु-पक्षी आदि की योनि में जन्म नहीं लेना पड़ता है । इस प्रकार सर्वसमर्थ पराशरनन्दन भगवान् व्यासजी ने इस स्तोत्र का माहात्म्य बतलाया है ।१३९।

इति श्री महाभारत शान्तिपर्वणि मोक्षपर्वणि दक्षप्रोक्त शिवसहस्रनामस्तवे चतुरशीत्यधिकद्विशततमोऽध्यायः ।२८४।

इस प्रकार श्री महाभारत शान्तिपर्व के अन्तर्गत मोक्षधर्मपर्व में दक्ष द्वारा कथित शिवसहस्रनाम स्तोत्र विषयक दो सौ चौरासीवां अध्याय पूरा हुआ ।

॥ ५१२. अथ 'गणेशाथर्वशीर्षम् ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्त्तासि । त्वमेव केवलं धर्त्तासि । त्वमेव केवलं हर्त्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्व साक्षादात्मासि नित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् । त्व वाङ्मयस्त्व चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्व सच्चिदानन्दाद्वितीयोऽसि । त्व प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिद त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारिवाक् पदानि । त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवःस्वरोम् । गणादीन्पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् । तारेण रुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः निचृद्गायत्री छन्दः । गणपतिर्देवता ॐ गं गणपतये नमः । एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् । एकदन्त चतुर्हस्तं पाशमङ्कुशधारिण म रदञ्च

वरद हस्तैर्बिभ्राणं मूषकध्वजम । रक्त लम्बोदर शूर्पकर्णक रक्त-
वाससम । रक्तगन्धानुलिप्ताङ्ग रक्तपुष्पैः सुपूजितम । भक्तानुक-
म्पिनं देव जगत्कारणमच्युतम । आविर्भूतञ्च सृष्टचादौ प्रकृतेः
पुरुषात्परम । एवं ध्यायति यो नित्य स योगी योगिनां वरः । नमो
व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बो-
दरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्त्तये नमः । एत-
दथर्वशीर्षं योधीते । स ब्रह्मभूयाय कल्पते । स सर्वाविघ्नैन बाध्यते ।
स सर्वतः सुखमेधते । स पञ्चमहापापात्प्रमुच्यत । सायमधीयानो
दिवसकृत पाप नाशयति । प्रातरधीयानो रात्रिकृत पापं नाशयति ।
सायम्प्रातः प्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो
भवति । धर्ममर्थं कामं मोक्षञ्च विन्दति । इदमथर्वशीर्षमशिष्याय
न देयम् । यो यदि मोहाद्दास्यति । स पापीयान् भवति । सहस्रा-
वर्त्तनाद्यं यं काममधीते । तं तमनेन साधयत् । अनेन गणपतिमाभि-
षिञ्चति । स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति । स विद्यावान्
भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरण विद्यान्न बिभेति
कदाचनेति । यो दूर्वांकुरैर्यजति । स वैश्रवणोपमो भवति । यो
लाजैर्यजति । स यशोवान् भवति । स मेधावान् भवति । यो
मोदकसहस्रेण यजति । स वांछितफलमवाप्नोति । यः साज्यसमि-
द्भिर्यजति । स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान्
सम्यग्ग्राहयित्वा । सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमा-
सन्निधौ वा जप्त्वा । सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते ।
महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते । स सर्वविद्भवति
स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् । ॐ शान्तिः शान्तिः
शान्तिः ॥ इति गणेशाथर्वशीर्षम् ॥

॥ ५१६. अथ 'देव्यथर्वशीर्षम्' ॥

ओं सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवी साब्रवीदहं
ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्य च
अहमानन्दानानन्दौ अहं विज्ञानाविज्ञाने अहं ब्रह्माब्रह्मणी द्वे ब्रह्मणी
वेदितव्ये । इति वाथर्वणी श्रुतिः । अहं पञ्चभूतानि अहं पञ्च-
तन्मात्राणि अहमखिलं जगत् वेदोहमवेदोहम् विद्याहमविद्याहम्
अजाहमनजाहम् अधश्चोर्ध्वं च तिर्यक्चाहम् अहँ रुद्रेभिर्वसुभि-
श्चरामि अहमादित्यैरुत विश्वदेवैः अहं मित्रावरुणावुभौ बिभर्मि
अहमिन्द्राग्नी अहमश्विनावुभौ अहँ सोमं त्वष्टारं पूषणं भगं
दधामि अहं विष्णुमुरुक्रमम् ब्रह्माणमुतप्रजापतिं दधामि अहं दधामि
द्रविणँ हविष्मते सुप्राव्ये यजमानाय सुन्वते अहँ राज्ञीसङ्गमनी
वसूनाम् चिकितुषी प्रथमा यज्ञियानाम् अहँ सुवे पितरमस्य
मूर्द्धन्मम योनिरप्स्वन्तः समुद्रे य एवं वेद सदेवीँ सम्पदमाप्नोति
ते देवा अब्रुवन् । नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः
प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् । तामग्निवर्णां तपसा
ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणं प्रपद्यामहे-
ऽसुरान्नाशयित्र्यै ते नमः । देवीं वाचमजनयन्त देवास्तां विश्वरूपाः
पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ।
कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् । सरस्वतीमदितिं
दक्षदुहितरं नमामः पावनां शिवाम् । महालक्ष्म्यै च विद्महे सर्वशक्त्यै
च धीमहि । तन्नो देवी प्रचोदयात् । अदितिर्ह्यजनिष्ट दक्षया
दुहिता तव । तां देवा अन्वजायन्त भद्रा अमृतबन्धवः । कामो
योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा

सकला मायया चापृथक्क्लेशा विश्वमातादिविद्याः । एषात्मशक्तिः एषा विश्वमोहिनी पाशांकुशधनुर्बाणधरा । एषा श्रीमहाविद्या । य एवं वेदस शोकं तरिति । नमस्ते भगवति मातरस्मान्पाहि सर्वतः । सैषा वैष्णवा वसवः सैवैकादश रुद्राः सैषा द्वादशादित्याः सैषा विश्वे देवाः सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचयक्षसिद्धाः सैषा सत्वरजस्तमांसि सैषा ब्रह्मविष्णुरुद्ररूपिणी सैषा प्रजापतीन्द्रमनवः सैषा ग्रहनक्षत्रज्योतिष्कलाकाष्ठादिविश्वरूपिणी तामहं प्रणौमि नित्यम् । पापापहारिणी देवी भुक्तिमुक्तिप्रदायिणी । अनन्तां विजयां शुद्धां शरण्यां सर्वदा शिवाम् । वियदाकारसंयुक्तं वीतिहोत्रसमन्वितम् । अर्द्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् । एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः । ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः । वाङ्मया ब्रह्मभूस्तस्मात् षष्ठवक्त्रसमन्वितम् । सूर्यो वामश्रोत्रबिन्दुसयुताष्टतृतीयकम् । नारायणेन संमिश्रो वायुश्चाधारयुक्तयः । विच्चे नवार्णकोणस्य महानानन्ददायकः । हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् । त्रिनेत्रां रक्तवसनां भक्तकामदुह भजे । भजामि त्वां महादेवि महाभयविनाशिनि । महादारिद्र्यशमनी महाकारुण्यरूपिणी । यस्याः स्वरूपं ब्रह्मादयो न जानन्ति । तस्मादुच्यते अज्ञेआ । यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता । यस्या लक्षं नोपलक्ष्यते तस्मादुच्यते अजा । एकैव सर्वत्र वर्त्तते तस्मादुच्यते एका । एकैव विश्वरूपिणी तस्मादुच्यतेऽनेका । अत एवोच्यतेऽज्ञेयानन्तालक्षाजैकानेका । मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी । ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी । यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्त्तिता । तां दुर्गां दुर्गमा देवीं

दुराचारविघातिनीम् । नमामि भवभीतोऽहं संसारार्णवतारिणीम । इदमथर्वशीर्षं योऽधीते । स पञ्चाथर्वशीर्षफलमाप्नोति । इदमथर्वशीर्षमज्ञात्वा योर्चाँ स्थापयति । शतलक्ष प्रजप्तापि नार्चाशुद्धिं च विन्दति । शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः । दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते । महादुर्गाणि तरति महादेव्याः प्रसादतः । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो भवति । निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति । भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति स महामृत्युं तरति । य एवं वेद इत्युपनिषत् ॥

॥ इति देव्यथर्वशीर्षम् ॥

॥ ५१४. अथ 'शिवाथर्वशीर्षम् ॥

ॐ देवा ह वै स्वर्गलोकमायंस्ते रुद्रमपृच्छन् को भवानिति । सोऽब्रवीदहमेकः प्रथममासोद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति । सोऽन्तरादन्तरं प्राविशदिशश्चान्तरं प्राविशत्सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोहं दक्षिणाञ्च उदञ्चोऽहमधश्चोर्ध्वश्चाहं दिशश्च प्रतिदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाऽहं छन्दोऽहं सत्योऽहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहं गौरहं गौर्यहमृगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोहं तेजोऽहं गुह्योऽहमरण्योऽहमक्षरमहं क्षरमहं पुष्करमहं पवित्रमहमुग्रञ्च बलिश्च पुरस्ताज्ज्योति-

रित्यहमेव सर्वेभ्यो मामेव स सर्वः समायो मां वेद स देवान्वेद सर्वांश्च वेदान् साङ्गानपि ब्राह्मणेश्च गां गोभिर्ब्राह्मणान् ब्राह्मणेन हविर्हविषा आयुरायुषा सत्यं सत्येन धर्मेण धर्मं तर्पयामि स्वेन तेजसा। ततो ह वै ते देवा रुद्रमपृच्छन् ते देवा रुद्रमपश्यन् ते देवा रुद्रमध्यायन् ते देवा ऊर्ध्वबाहवो रुद्रं स्तुवन्ति ।१। ओं यो वै रुद्रः स भगवान यश्च ब्रह्मा तस्मै वै नमो नमः ।१। यो वै रुद्रः स भगवान् यश्च विष्णुस्तस्मै० ।२। यो वै रुद्रः स भगवान् यश्च स्कन्दस्तस्मै० ।३। यो वै रुद्रः स भगवान् यश्चेन्द्रस्तस्मै० ।४। यो वै रुद्रः स भगवान् यश्चाग्निस्तस्मै० ।५। यो वै रुद्रः स भगवान् यश्च वायुस्तस्मै० ।६। यो वै रुद्रः स भगवान् यश्च सूर्यस्तस्मै० ।७। यो वै रुद्रः स भगवान् यश्च सोमस्तस्मै० ।८। यो वै रुद्रः स भगवान् ये चाष्टौ ग्रहास्तस्मै० ।९। यो वै रुद्रः स भगवान् ये चाष्टौ प्रतिग्रहास्तस्मै० ।१०। यो वै रुद्रः स भगवान् यच्च भूस्तस्मै० ।११। यो वै रुद्रः स भगवान् यच्च भुवस्तस्मै० ।१२। यो वै रुद्र स भगवान् यच्च स्वस्तस्मै० ।१३। यो वै रुद्रः स भगवान् यच्च महस्तस्मै० ।१४। यो वै रुद्रः स भगवान् या च पृथिवी तस्मै० ।१५। यो वै रुद्रः स भगवान् यच्चन्तरिक्षं तस्मै० ।१६। यो वै रुद्रः स भगवान् या च द्यौस्तस्मै० ।१७। यो वै रुद्रः स भगवान् याश्चापस्तस्मै० ।१८। यो वै रुद्रः स भगवान् यच्च तेजस्तस्मै० ।१९। यो वै रुद्रः स भगवान् यश्च कालस्तस्मै० ।२०। यो वै रुद्रः स भगवान् यश्च यमस्तस्मै० ।२१। यो वै रुद्रः स भगवान् यश्च मृत्युस्तस्मै० ।२२। यो वै रुद्रः स भगवान् यच्चामृतं तस्मै० ।२३। यो वै रुद्रः सः भगवान् यच्चाकाशं तस्मै० ।२४। यो वै रुद्रः स

भगवान् यच्च विश्वं तस्मै० ।२५। यो वै रुद्रः स भगवान् यच्च स्थूलं तस्मै० ।२६। यो वै रुद्रः स भगवान् यच्च सूक्ष्मं तस्मै० ।२७। यो वै रुद्रः स भगवान् यच्च शुक्लं तस्म० ।२८। यो वै रुद्रः स भगवान् यच्च कृष्णं तस्मै० ।२९। यो वै रुद्रः भगवान् यच्च कृत्स्नं तस्मै० ।३०। यो वै रुद्रः स भगवान् यच्च सत्यं तस्मै० ।३१। यो वै रुद्रः स भगवान् यच्च सर्वं तस्मै० ।३२।२। भूस्ते आदिर्मध्य भुवस्ते स्वस्ते शीर्षं विश्वरूपोऽसि ब्रह्मैकस्त्वं द्विधा त्रिधा वृद्धिस्त्वं शान्तिस्त्वं पुष्टिस्त्वं हुतमहुत दत्तमदत्तं सर्वमसर्वं विश्वमविश्वं कृतमकृत परमपरं परायणञ्च त्वम्। अपामसोममृता अभूमागन्म ज्योतिरविदाम देवान्। किंनूनमस्मान् कृणवदरातिः किमु धूर्तिरमृतं मर्त्यस्य सोमसूर्यपुरस्तात्सूक्ष्मः पुरुषः। सर्वं जगद्धितं वा एतदक्षरं प्राजापत्यं सौम्यं सूक्ष्म पुरुषं ग्राह्यमग्राह्येण भावं भावेन सौम्यं सौम्येन सूक्ष्मं सूक्ष्मेण वायव्यं वायव्येन ग्रसति तस्मै महाग्रासाय वै नमो नमः। हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः। तस्योत्तरतः शिरो दक्षिणतः पादौ य उत्तरतः स ओङ्कारः य ओङ्कारः स प्रणवः यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तः योऽनन्तस्तत्तारं यत्तारं तच्छुक्लं यच्छुक्लं तत्सूक्ष्मं यत्सूक्ष्मं तद्वैद्युतं यद्वैद्युतं ब्रह्म यत परं ब्रह्म स एकः य एकः स रुद्रः यो रुद्रः स ईशानः य ईशानः स भगवा ् महेश्वरः ।३। अथ कस्मादुच्यते ओङ्कारः। यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयति तस्मादुच्यते ओङ्कारः। अथ कस्मादुच्यते प्रणवः यस्मादुच्चार्यमाण एव ऋग्यजुःसामाथर्वाङ्गिरस ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणवः। अथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाण एव यथा स्नेहेन पलल-

षिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्यते सर्वव्यापी। अथ कस्मादुच्यतेऽनन्तः यस्मादुच्चार्यमाण एव तिर्यगूर्ध्वमधस्ताच्चास्यान्तो नोपलभ्यते तस्मादुच्यदेऽनन्तः । अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयति त्रायते च तस्मादुच्यते तारम् । अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एव क्लन्दते क्लामयति च तस्मादुच्यते शुक्लम् । अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृश्यति तस्मादुच्यते सूक्ष्मम् । अथ कस्मादुच्यते वैद्युतम् । यस्मादुच्चार्यमाण एव व्यक्ते महति तमसि द्योतयति तस्मादुच्यते वै द्युतम् । अथ कस्मादुच्यते परं ब्रह्म यस्मात परमपरं परायणञ्च बृहद्बृहत्या बृंहयति तस्मादुच्यते परं ब्रह्म । अथ कस्मादुच्यते एकः यः सर्वान् प्राणान् सम्भक्ष्य सम्भक्षणेनाजः ससृजति विसृजति तीर्थमेक व्रजन्ति तीर्थमेके दक्षिणाः प्रत्यञ्च उदञ्चः प्राञ्चोऽभिव्रजन्त्येके तेषां सर्वेषामिह सङ्गतिः साकं स एकोऽभूदन्तश्चरति प्रजानां तस्मादुच्यते एकः । अथ कस्मादुच्यते रुद्रः यस्मादृषिभिर्नान्यैर्भक्तर्द्रुतमस्य रूपमुपलभ्यते तस्मादुच्यते रुद्रः । अथ कस्मादुच्यते ईशानः यः सर्वान्देवानीशते ईशानीभिर्जननीभिश्च शक्तिभिः । अभित्वा शूरनोनुमो दुघा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुष इति तस्मादुच्यते ईशानः । अथ कस्मादुच्यते भगवान् महेश्वरः यस्माज्ज्ञानैश्वर्यान् ज्ञानेन भजत्यनुगृह्णाति च वाचं ससृजति विसृजति च सर्वान् भावान्परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते यस्मादुच्यते भगवान् महेश्वरः । तदेतद्रुद्रचरितम् ।४। एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः । स एव

जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः । एको रुद्रो न द्वितीयाय तस्मै य इमांल्लोकानीशत ईशनीभिः । प्रत्यङ्जनास्तिष्ठति चान्तकाले संसृज्य विश्वाभुवनानि गोप्ता । यो योनिं योनिमधितिष्ठत्येको येनेदं सर्वं विचरति सर्वम् । तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति । क्षमां हित्वा हेतुजालस्य मूलं बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे । रुद्रमेकत्वमाहुः शाश्वतं वै पुराणमिषमूर्जेण पशवोनुनामयन्तं मृत्युपाशान् । तदेतेनात्मन्नतेनार्धचतुर्थेन मात्रेण शान्तिं संसृजति पशुपाशविमोक्षणं या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता वर्णेन यस्तां ध्यायते नित्यं स गच्छेद्ब्रह्मपदम् । या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णवर्णेन यस्तां ध्यायते नित्यं स गच्छेद्वैष्णवं पदम् । या सा तृतीया मात्रा ईशानदेवत्या कपिला वर्णेन यस्तां ध्यायते नित्यं स गच्छेदैशानं पदम् । या साधंचतुर्थी मात्रा सर्वदेवत्याऽव्यक्तीभूता खं विचरति शुद्धा स्फटिकसन्निभा वर्णेन यस्तां ध्यायते नित्यं स गच्छेत्पदमनामयम् । तदेतदुपासीत मुनयो वाग्वदन्ति न तस्य ग्रहणमय पन्था विहित उत्तरेण येन देवा यान्ति येन पितरो येन देवा यान्ति येन पितरो येन ऋषयः परमपरं परायणं चेति । वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातरूपं वरेण्यम् । तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां शान्तिर्भवति नेतरेषाम् । यस्मिन् क्रोधं याञ्च तृष्णां क्षमाञ्चाक्षमां हित्वा हेतुजालस्य मूलम् । बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे रुद्रमेकत्वमाहुः । रुद्रो हि शाश्वतेन वै पुराणेनेषमूर्जेण तपसा नियन्ता ग्निरिति भस्म वायुरिति भस्म जलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि यस्मादव्रतमिदं पाशुपतं यद्भस्म नाङ्गानि संस्पृशेत् तस्मादब्रह्म तदेतत्पाशुपतं

पशुपाशविमोक्षणाय ।५। योऽग्नौ रुद्रो योऽप्स्वन्तर्य ओषधीर्वीरुध आविवेश । य इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमोऽस्त्वग्नये । यो रुद्रोऽग्नौ यो रुद्रोऽप्स्वन्तर्यो रुद्र ओषधीर्वीरुध आविवेश । यो रुद्र इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय वै नमो नमः । यो रुद्रोऽप्सु यो रुद्र ओषधीषु यो रुद्रो वनस्पतिषु । येन रुद्रेण जगदूर्ध्वं धारितं पृथिवी द्विधा त्रिधा धर्त्ता धारिता नागा येन्तरिक्षे तस्मै रुद्राय वै नमो नमः । मूर्धानमस्य संसेव्याप्यथर्वा हृदयञ्च यत् । मस्तिष्कादूर्ध्वं प्रेरयत्यवमानोऽधिशीर्षतः । तद्वा अथर्वणः शिरो देवकोशः समुज्झितः । तत् प्राणोऽभिरक्षति शिरोऽन्नमथो मनः । न च दिवो देवजनेन गुप्ता न चान्तरिक्षाणि न च भूम इमाः । यस्मिन्निदं सर्वमोतप्रोतं तस्मादन्यन्न परं किञ्च नास्ति । न तस्मात्पूर्वं न परं तदस्ति न भूतं नोत भव्यं यदासीत सहस्रपादेकमूर्ध्ना व्याप्त स एवेदमावरीवर्ति भूतम् । अक्षरात् सञ्जायते कालः कालाद् व्यापक उच्यते । व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्यते प्रजाः । उच्छ्वसिते तमो भवति तमस आपोऽश्वङ्गल्या मथिते मथितं शिशिरे शिशिरं मथ्यमान फेनं भवति फेनादण्डं भवत्यण्डाद्ब्रह्मा भवति ब्रह्मणो वायुः वायोरोङ्कारः ओङ्कारात्सावित्री सावित्र्या गायत्री गायत्र्या लोका भवन्ति । अर्चयन्ति तपः सत्यं मधुक्षरन्ति यद्ध्रुवम् । एतद्धि परमं तपः । आपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरों नम इति ।६। य इदमथर्वशिरो ब्राह्मणोऽधीते । अश्रोत्रियः श्रोत्रियो भवति । अनुपनीत उपनीतो भवति । सोऽग्निपूतो भवति । स वायुपूतो भवति । स सूर्यपूतो भवति । स सोमपूतो भवति । स सत्यपूतो भवति । स सर्वैर्देवैर्ज्ञातो भवति । स सर्वैर्वेदैरनुध्यातो भवति ।

स सर्वेषु तीर्थेषु स्नातो भवति । तेन सर्वैः क्रतुभिरिष्टं भवति । गायत्र्याः षष्टिसहस्राणि जप्तानि भवन्ति । प्रणवानामयुतं जप्तं भवति । स चक्षुषः पङ्क्तिं पुनाति । आसप्तमात् पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति । द्वितीयं जप्त्वा गणाधिपत्यमवाप्नोति । तृतीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यमों सत्यम् इत्थर्वशिरे शिवाथर्वशीर्षम्

(इति शिरउपनिषत्)

।। ५१३. अथ 'नारायणाथर्वशीर्षम् ।।

अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात्प्राणो जायते । मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते । नारायणाद्विष्णुर्जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात्प्रजापतिः प्रजायते । नारयणाद्द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि । नारायणाद्देवाः समुत्पद्यन्ते । नारायणात्प्रवर्तन्ते । नारायणे प्रलीयन्ते । अथादित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । ऊर्ध्वं च नारायणः । अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वं यद्भूतं यच्च भाव्यम् । निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति । ओं इत्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् । ओं इत्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणेति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं

पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमनध्येति । अनुपब्रह्मः सर्वमायुरेति । विन्दते प्रजां रायस्पोषं गौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम् । अकार उकारो मकार इति । तानेकधा संयोज्य तदेव तदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ओं नमो नारायणायेति मन्त्रोपासकः । वैकुण्ठभुवनं गच्छति । तदिदं परमं पुण्डरीकं विज्ञानघनम् । तस्मात्तडिदाभमात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः । सर्वभूतस्थमेकं वै नारायणम् । कारणरूपं परब्रह्मकम् । एतदथर्वशीर्ष योऽधीते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो भवति । मध्यन्दिनमादित्याभिमुखोऽधीयानः । सद्यः पञ्चामहापातकोपपातकेभ्यो मुच्यते । सर्ववेदपारायणपुण्यं लभते । श्रीनारायणसायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ॥

॥ इति नारायणाथर्वशीर्षम् ॥

॥ ५१५. अथ 'सूर्याथर्वशीर्षम् ॥

अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः ब्रह्मा ऋषिः । आदित्यो देवता । गायत्री छन्दः । हंसाग्निनारायणयुक्तं बीजम् । हल्लेखा शक्तिः । द्विपदादि सर्गसंयुक्तं कीलकम् । धर्मार्थकाममोक्षेषु जपे विनियोगः ।

षट्स्वरारूढबीजेन षडङ्गं रक्ताम्बुजसंस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं च श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः । ओं भूः । ओं भुवः । ओं स्वः । ओं

महः । ओंजनः । ओं तपः । ओं सत्यम् । ओं तत्सवि॰ परोरजसेसावदोम् । ओं-आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् । सूर्य आत्मा जगतस्तस्थुषश्च । सूर्याद्वै खल्विमानि भूतानि जायन्ते । सूर्याद्यज्ञाः पर्जन्योऽन्नमात्मा । नमस्ते आदित्याय त्वमेव केवलं कर्त्तासि । त्वमेव प्रत्यक्षं विष्णुरसि । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं रुद्रोऽसि त्वमेव प्रत्यक्षमृक्सामासि त्वमेव प्रत्यक्ष यजुरसि । त्वमेव प्रत्यक्षं सामासि । त्वमेव प्रत्यक्षमथर्वासि । त्वमेव सर्वं छन्दोसि । आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापो जायन्ते । आदित्याज्ज्योतिर्जायते । आदित्याद्व्योम दिशो जायन्ते । आदित्याद्वेदा जायन्ते । आदित्याद्देवा जायन्ते । आदित्यो वा एष एतन्मण्डलं तपति । असावादित्यो ब्रह्म । आदित्योऽन्तःकरणमनोबुद्धिचित्ताहङ्काराः । आदित्यो वै व्यानसमानोदानापानप्राणाः । आदित्यो वै श्रोत्रत्वक्चक्षुरसनानासाः । आदित्यो वै वाक्पाणिपादोपस्थपायूनि । आदित्यो वै शब्दस्पर्शरूपरसगन्धाः । आदित्यो वै वचनादानगमनानन्दविसर्गाः । आनन्दमयो ज्ञानमयो विज्ञानमय आदित्य । नमो मित्राय भानवे मृत्योर्मा पाहि भ्राजिष्णवे विश्वहेतवे नमः । सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् । अग्निर्नः पार्थिवेभ्यः । सूर्याद्भवन्ति भूतानि । सूर्येण पालितानि तु । सूर्ये लयं प्राप्नुवन्ति । यः सूर्यः सोहमेव च । चक्षुर्नोदेवः सविता । चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः । आदित्याय विद्महे सहस्रकराय धीमहि । तन्नः सूर्यः प्रचोदयात् । सविता पश्चात्तात् । सविता पुरस्तात् । सवितोत्तरात्तात् । सविताधरात्तात् । सविता नः सुवतु सर्वतातिम् । सवितानो रासतां दीर्घमायुः । ओमित्येकाक्षरं ब्रह्म घृणिरिति द्वे अक्षरे सूर्य इत्यक्षरद्वयम् । आदित्य इति

त्रीण्यक्षराणि एतद्वै सूर्यस्याष्टाक्षरं मनुम् । यः सदाहरहर्जपति । योऽसौ ब्रह्मण्योब्राह्मणो भवति । सूर्याभिमुखं जप्त्वा महाव्याधिभयात्प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्यभक्षणात्पूतो भवति । अपेयपानात्पूतो भवति । अगम्यागमनात्पूतो भवति । व्रात्यसम्भाषणात्पूतो भवति । मध्याह्ने सूर्याभिमुखः पठेत् । सद्यः पञ्चमहापापात्प्रमुच्यते । सैषा सावित्री विद्या न कस्यचित्प्रशंसेत् । एतन्महाभागः प्रातः पठति स भाग्यवान् जायते । पशून् विन्दति वेदार्थं लभते । त्रिकालं जप्त्वा क्रतुशतफलं प्राप्तोति । हस्तादित्ये जपति स महामृत्युं तरति । य एवं वेद । इत्युपनिषत् ॥इति सूर्याथर्वशीर्षम्॥

卐 श्री देविकालहरी 卐

श्रियामायानं यद्विमलवसने सर्वजगतां
क्रियाणाम्बुध्नन्ते नियत हविषां पावनविधौ ।
धियां पावित्र्योऽवनिविदिततीर्थं वनमय-
वपुश्चेदं शर्वे सकलमशुभं वारयतु नः ।१।

शिवार्द्धाङ्गे वासो विधिजतनयायाः प्रथमतो
गृहन्ते कैलासे रजितभुवनभ्राजिततटे ।
अमर्त्याऽऽक्रीडे बाऽप्यवनिधरपुत्र्यास्सुरनुते-
सरिद्रूपञ्चैतद्धरतु जगतां पापमखिलम् ।२।

इदङ्कुर्म्माधानम्भुवनजगताँ खण्डमखिलं-
पवित्रीकर्त्तुं वै नवसलिलबिम्बं विदधती ।
प्रभासे शुद्धे च द्रुमवति सुघाटे सुरपतेः-
समुत्तीर्णाधाराभरणवसना शैवशिखरात् ।३।

सरिद्रूपन्धृत्वाजनि वृजिननाशङ्करु शिवं-
जनानां मद्राणां गृहतनयवित्ताप्तमनसाम् ।
उवाचेदं शम्भुर्मृदुतरमनोज्ञं मधुवचः-
भवानीमापन्नां विनयनतदेहाँ निजगिरौ ।४।

शिवाशम्भोराज्ञाँ परिणतगुणस्यामरगणै-
र्गृहीत्वा कैलासाज्जनकुशलभावाभिजननी ।
समुत्तीर्णादिष्ट्वा हरशिरसि जाताँ सुरनदीं-
दधौ रूपम्भव्यं वनमयवपुर्दाविकमिदम् ।५।

तदाशम्भूरूपं मुनिवरनुतं लैङ्गमधिकं-
दधारोच्चैस्तीरे भुवनवनशैलद्युतिकरम् ।
वृषाद्यैर्देवेशैर्नमितवदनैर्वन्धमभितो-
भवानी व्याश्लेषादमितमहिमाशङ्कितमनाः ।६।

यदा चैन्द्राद्घाटादचलदमलं वारिनिचयं-
नुतिङ्गौर्य्याश्चक्रुर्मुनिवरसमूहाः समुचिताम् ।
तदा वीणानादध्वनितमुरजैः किन्नरगणैः-
स्वरैश्चेदम्भद्रं त्रिदशवरवध्वा परिजगुः ।७।

यदाविर्भूतन्ते द्युतिधरपदाद्दाविकपयो-
जनानामज्ञानाँ शमलभवतापोपशमनम् ।
निषेव्यन्तत्प्राज्ञैर्दिविजनमितन्नो हृदि सदा-
वसत्वेवं चक्रुर्नतिमखिलदेवाः श्रुतिधराः ।८।

समृद्धं स्वामित्वं परिजनवृतं त्यज्य सहसा-
जननयास्तत्वानां मृदुलतटवासा ऽमलदृशाम् ।

पयस्तेस्वादीयो विमलतरमातृप्तिपिबताँ-
मृषायन्ते, सद्यः सुरवरपदेव्योऽपि विविधाः ।९।

स्पृशन् यस्सौगन्ध्यन्नवसुमनसां धीरपवन-
स्त्वदीयानाँ प्रावृड्जनितलहरीणां व्यतिकरात् ।
पुनातीमाँ पूतस्त्ववनिमखिलां स्वर्ग सहितां-
निनादोऽपान्ते यः शमयति खलूच्चैर्यमरुतम् ।१०।

अमी मातर्धन्याः खगमृगगणा दाविकतटे-
पयः पूतं पीत्वा शमितदुरिता दिव्यवपुषः ।
व्रजन्त्यन्ते शान्तास्त्रिदशवरवृन्दप्रमुदिता-
महन्माहेन्द्रं ते निबिडतरुरम्यं वनमदः ।११।

अनूरौ स्नान्तीनाँ जनपदवधूनां घनकुचं-
स्थितं सौगन्ध्यं यन्मृगमदयुतं दाविकवने ।
वलन्त्यन्तस्ते तन्मृतमृगसमूहा दिवमिता-
स्तवैतत्प्राकाम्यं जननि गदितुन्नार्हति विधिः ।१२।

त्वदम्बूनाँ नाम स्मरति हृदये दाविकमिति-
जनः पावित्र्यान्भवति शतपापैरपि वृतः ।
अहो चालं वासो जननि तव तीरे बनमहो-
जनोद्धारं बद्धादृढपरिकरं त्वङ्कुरु भवात् ।१३।

श्रितोऽपान्तेमार्तविषयविषतृष्णावृतचिदाम्-
अदृश्यः पाताले त्वमितवलवल्यादिभिरपि ।
कफादिव्यावर्त्तं वदनविवरं जातु विशतां-
शरीरान्ते तावत्यरमफलदो नोऽपि भवतु ।१४।

पिनाकीकैलाशे पदविधुतिभिर्नृत्यति मुदा-
विभुश्शेतामब्धौ भुजगमृदुभोगोऽपि शयने ।
विधातात्रैपृष्टे त्वविरतसमाधिर्भवतु वा
तदौदास्यन्दृष्ट्वा जननि तव तीरं ह्यपगतः ।१५।

विभुर्भक्ताऽतर्कोमदनभटहन्ता च मनसा-
उपेक्षन्ते माम्यैर्द्रुतपिहितकर्णाः करपुटैः ।
स्फुटस्ते व्यासङ्गो मदपतितनिस्तारणकृतौ
अतोमातस्त्वां वै शरणपदवीं यामि सततम् ।१६।

अवक्तव्यं वाक्यैः पिशुनमनुजैर्यन्न्यपहृतं-
विगर्ह्यन्तून्मत्तैरतिपतितवृन्दैः परिहृतम् ।
हरन्त्येनःसर्वं श्रमविरहितैका विजयते-
यदुद्धारौदास्यं भवति भजतान्मार्द्रहृदया ।१७।

यदौदास्यं जाताऽऽस्यमलहृदयध्यानपथगे-
ममाघव्यूहान्ते ऽकृतभजनहव्याधिपनतेः ।

तदानीमेवार्ये जगति जयिनामूर्जितयशो-
लयं याता रम्यं शमनभटहासस्तवतटे ।१८।

मदोन्मत्तानस्तान् वृषलरमणीसक्तमनसः-
महारोगग्रस्तान् करपदविहीनानपि नरान् ।
जडान्यन्धव्यङ्गान्प्रकृतिविषमाद्यानपि नरान्-
परित्यक्तान्देवैरमतमवितुं स्वौषधमसि ।१९।

यदन्तः क्रीडन्तोन्वनवरतमानन्दभरिता-
न गृध्राःश्वेतास्ते त्रिदिवगमनेच्छाजितयमाः ।
निवेशान्नारीणामशुभशमनो ऽवद्यवपुषां-
तटोऽयं मातस्ते भव विगमशूरो भवतु नः ।२०।

विभान्तेभूतेशाजटिलशिरसश्चन्द्रविभया-
निनेतुँ ह्यायातायम पुरमघा ये यमभटा ः।
कृता वासन्तीरे जननि तव शुद्धे च मनुजं-
गतं पञ्चत्वं ते हृतकलुषमालोक्य विगताः ।२१।

वृहत्त्वद्वीचीनाममलपयसा मार्ज्जितवपुः-
शरीरान्ते शेते धृतिधर नरो दाविकतटे ।
तदैनद्धित्वार्य्ये व्रजति पदमाद्यं मधुरिपो-
र्विमानस्थो मान्यस्त्वदितिलनुजातामपि दिवि ।२२।

सुशैलं निश्शोकं कमनकलहंसाद्यभिरमं-
तरुव्रातच्छायं कुसुमभरलुब्धालिनिचितम् ।
सुधा प्रख्या धारापतनध्वनितं दाविकमिदं-
पुनीतं तीरन्ते मदघवृकयूथं विधमतु ।२३।

भवत्यां सावित्र्यां श्रुतिकुशलमादौ व्यवसितं-
शिवम्भूर्य्यायासं विधिधृतविशेषं बहुपथम् ।
तदेवायं धत्ते त्रिदिवगमनायाश्ववहित-
स्तवैतेनैवैतन्नवलषयसाऽभ्येति सकलम् ।२४।

प्रवाहेऽपान्तेयाः सिततरलहर्य्यो घनतटा-
स्तरङ्गैरुत्तेङ्गैर्मृदुल पवनैश्चापि च लतैः ।
सुधासिन्धो मातर्भव वनभवाग्निञ्चलशिखं-
नयन्त्वार्द्रैः शार्न्ति विवनगृहकूपप्रपतिताम् ।२५।

इयं या ते मूर्त्तिः सुरवरनुता पावनमयी-
जनानां येषां हृन्नवनलिन नालं यदि गता ।
निहन्त्याश्वेनांसि त्वरुण इव भूर्य्यास्तृततमः-
घटस्वेदानी मे यमरणकृपोद्धारसरणीम् ।२६।

शरच्चन्द्राभां त्वाममलविधुबिम्बार्द्धमुकटां-
सुनद्धग्रैवेयद्युतिनिकरभूषाङ्गदधतीम् ।

जपन्त्यायत्ताहृन्नवजलजकोशे सुमनसः-
न तेषां भक्तानाँ क्वचिदपि च याम्यः परिभवः ।२७।

स्तवैर्देवीस्तव्यां श्रुतिविदितसारार्थललितैः-
महापद्मासीनां भजनवरदाँ शुभ्रवसनाम् ।
स्मरन्ति ध्यानेनैकतरमनसा येऽघधमनीं-
विसृज्येमं मर्त्या गिरिशधरशृङ्गेऽमृतभुजः ।२८।

वहन्तीं शीताँशुं शिरसि तव सीमन्तसरणीं-
द्विधाभिन्नाकेशां करविधृतपद्माँ विधिनुताम् ।
जनास्त्वद्भृत्या ये त्ववनिपृथुपृष्ठे सुविमले-
भजन्ति त्वामम्ब प्रतिदिवसमाजन्मपविताः ।२९।

हरन्त्याः सत्वानां दुरितसमवायं शिवचिदा-
स्वसृष्टानाम्भूतैः प्रबलगुणमय्या गिरिसुते ।
धृता पाश्चार्द्धाङ्गे हतमनसिजेनातिवशिना-
महत्वं वक्तुन्ते कथमपि न विज्ञः प्रभवति ।३०।

समृद्धित्वं भूमेर्जलधिपरिधेर्भूरिवितथं-
किमीश त्वं क्रोडारचितजगताँ यत्पशुपतेः ।
स्मृतीनाँ वचित्र्यं फलमथ सताँ पुण्यनिवहं-
पयः पीयूषाभं तव जननि शन्नः प्रदिशतु ।३१।

विरिञ्चिः सञ्चिन्वंस्तव चरणकञ्जोद्भवपयः-
स देवान्सर्वेशः प्रजनयति लोकानवरतम् ।
विमृग्यं शेषेणाऽप्यवनिदधता सेव शिखरात्-
समुत्तीर्णा कर्त्तुं दिविज नरसूद्धारणविधिम् ।३२।

शचीशोऽपीदन्ते ललितचरणाम्भोजसलिलं-
गजेन्द्रावुत्तीर्य्यविनितलमगम्यं दिविषदाम् ।
शिरस्याधत्ते यो मणिमयकिरीटद्युति मति-
र्वृतो देवव्रातैस्त्रिदशवनितानृत्यमुदितैः ।३३।

सुरस्त्रीसंघातस्त्रिदिवभुवनाद्दाविकपयः-
परिस्नातुं यातस्तव जननि तीरं हयमुखैः ।
जगौ चेदम्भद्रं श्रुतिमृदुलमध्यं समुरजै-
रमूतत्सङ्गीतं गिरिशसुखदङ्कीचकरवम् ।३४।

मुनिव्रातैर्यत्तैस्समरशतधीरैश्च कृतिभिः-
सुरज्येष्ठेनापि स्मरभटमजेयं हि वलिनम् ।
निहत्याजौ रुद्रोऽखिलभुवनवंद्यां सुयतिता-
मगात्त्वत्सम्पर्कादशुभशमनी नो भव शिवे ।३५।

इदन्ते शीताम्भः स्फटिकप्रतिमं कौतपविधौ-
प्रयुक्तं पश्यानान्दुरितभरविस्राब्धिपतितां ।

व्यसूनामुद्धारञ्जन निकुरुते ते च विदिते-
महीयन्ते लोके शिशिरशशिनः शान्तवपुषः ।३६।

लतासम्पृक्तानान्नवकुसुमभारप्रवहता-
न्तरूणान्तामस्यं मधुकरवृतानां परिगतम् ।
त्वदीयानां पानाद्विशदपयसामार्ज्जवपदै-
स्तरङ्गोत्सृष्टानाञ्जननि तरुजन्मापि च यतः ३७।

चलद्वीचीक्षोभभ्रमित झषचक्रोज्जितरवे-
जगत्प्राणोद्भूतद्रुमगलितपुष्पाऽऽस्तृततटे ।
प्रवाहे त्वद्वारां पिकशिखिगणा येऽतिमधुरं-
नदन्तोहाऽऽलोकध्वनय इव पूलांघ्रिपगृहाः ३८।

अहोऽन्तर्मंद्राणां हिमगिरिगुरोर्दुग्रहृदयात्-
सहस्राराधारे भगवति शिवे दाविकमयं ।
चतुर्विंशत्क्रोशायतिरपि चतुर्विंस्तृतिरथो-
मुमुक्षुप्रेतानां तरणि ! तरणौ नत्वदपरा ।३९।

नमश्चिद्रूपायै त्रिगुणबलमय्यै प्रकृतये ।
नमः सद्रूपायै विधुशकलमौलेऽखिलभृते ॥
सरिद्रूपायै ते पवितवसुधायै श्रुतवतां-
ददत्यै निर्वाणं निरवधिसुखं सत्वनिधये ।४०।

जगत्पूज्यायै ते यजनफलदायै भव छिदे-
नमो मेदिन्यै ते ऽखिलवसुधरायै सुश्रवसे ।
नमो धीरायै ते विशदगुणमय्यै सुगतये ।
नमो वैष्णव्यै ते मुनिवृढयुतायै सुमतये ।४१।

यस्यास्तेऽमलवीचयो भुवि ववुर्गुप्ताऽऽस्तृता देविके-
या धृत्वाऽ खिलवंद्यवेदवदनास्त्वङ्के ऽज लोकङ्गताः ।
दण्डाद्यस्त्रधरामहोग्रवपुषो याभ्यो यमा दूरत-
स्ता दिव्या नरलोकपावनकराः सेव्या बुधैस्सर्वदा ।४२।

यस्मिन्प्रपीते पयसि त्वदीये नृणामघं नश्यति चान्तराश्रितम् ।
स्वच्छं सुधासम्मितमद्यनस्तत्करोतु भव्यम्भवभीतचेतसाम् ।४३

त्वत्पादसम्भूतपयः प्रचेतास्तं धार्य्य पूतं शिरसाप सिद्धिम् ।
शेषस्त्वदीयान्विदितान्गुणान्वै शक्नोति नैवाद्यतने न मातुम्४४

त्वमेव गंगा यमुना त्वमेव त्वमेव सिन्धुश्च सरस्वती वै ।
त्वन्देविकारूपमपीह शर्वे दधर्थलोकाय विनाशनाय ।४५।

त्वमेव मातर्बहुधा व्यवस्थिता त्वमेव माया खलु शाम्भवीति ।
त्वत्तोऽप्यनन्ता जगतःप्रसूतिस्तत्वैश्चिदाभास बलेन देव्याः ४६

सदाऽऽपोज्योतिष्टे ऽवनिदहरगान्तः प्रवहति-
भुवः पृष्ठस्थानाँ सकलशमलानि प्रदहति ।
इदानीं हिन्दूनां निखिलकलुषं त्वं परिहर-
कुरुष्वैतान्नित्यं हृदयबलयुक्तानृषिवृढान् ।४७।

सदाचारे निष्ठान्प्रबलतमदुष्टक्षयकरान्-
प्रचारे वेदानामनुदिनमधियज्ञे रुचियुताम् ।
गृहेष्वासक्तानां हृदि सबलनिष्ठां द्रढयितुं-
सशक्तान्वाग्भक्ताऽजननि ! कुरु सद्योऽग्रजवरान् ।४८।

अज्ञात विदुषा सृष्टाँ लहरीं देविका प्रियाम् ।
विहारीलाल वासिष्ठो मुद्राप्यैनां समर्पये ।।

।। इति श्रीदेविकालहरी सम्पूर्णा ।।

卐 अथ महामृत्युञ्जयस्तोत्रम् 卐

नमो महामृत्युञ्जयाय । श्रीनन्दिकेश्वर उवाच–

कैलासस्योत्तरे शृङ्गे शुद्धस्फटिकसन्निभे ।
तमोगुणविहीने तु जरामृत्युविवर्जिते ।१।
सर्वतीर्थास्पदाधारे सर्वज्ञानकृतालये ।
कृताञ्जलिपुटो ब्रह्मा ध्यानशीलं सदाशिवम् ।२।
पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनीं गतः ।
सर्वार्थसम्यगाधारं ब्रह्मा लोकपितामहः ।३।

ब्रह्मोवाच

केनोपायेन देवेश ! चिरायुर्लोमशोऽभवत् ।
तन्मे ब्रूहि महेशान ! लोकानां हितकाम्यया ।४।

श्रीसदाशिवःप्राह

शृणु ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ।
सञ्जातः कर्मणा येन व्याधिमृत्युविवर्जितः ।५।
तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते ।
कृतान्तभवनाशाय स्तुतो मृत्युञ्जयः शिवः ।६।

तस्य संकीर्तनान्नित्यं मुनिर्मृत्युविवर्जितः ।
तमेव कीर्तयन् ब्रह्मन् मृत्युञ्जेतुं न संशयः ।७।

लोमेश उवाच

देवाधिदेव देवेश ! सर्वप्राणभृतांवर ।
प्राणिनामसि नाथस्त्वं मृत्युञ्जय नमोऽस्तु ते ।८।
देवानाँ जीवभूतोऽसि जीवो जीवस्य कारणम् ।
जगतां रक्षकस्त्वं वै मृत्युञ्जय नमोऽस्तु ते ।९।
हिमाद्रिशिखराकार सुधावीचिमनोहर ।
पुण्डरीक परं ज्योतिर्मृत्युञ्जय नमोऽस्तु ते ।१०।
ध्यानाधार महाज्ञान ! सर्वज्ञानैककारण ।
परित्राताऽसि लोकानां मृत्युंजय नमोऽस्तु ते ।११।
निहता येन कालेन सदेवासुरमानवाः ।
गन्धर्वाप्सरसश्चैव सिद्धविद्याधरास्तथा ।१२।
साध्याश्च वसवो रुद्रा तथाश्विनिसुतावुभौ ।
मरुतश्च दिशो नागाः स्थावरा जङ्गमास्तथा ।१३।
अनङ्गेन मनोजेन पुष्पचापेन केवलम् ।
जितःसोऽपि त्वया ध्यानान्मृत्युञ्जय नमोऽस्तु ते ।१४।

ये ध्यायन्ति परां मूर्ति पूजयन्त्यमराधिप ।
न ते मृत्युवशं यान्ति मृत्युञ्जय नमोस्तु ते ।१५।
स्थावरे जङ्गमे वापि यावत्तिष्ठति मेदिनी ।
जीवतु इत्याह लोकोऽयं मृत्युञ्जय नमोऽस्तु ते ।१६।
त्वमोंकारोऽसि वेदानां देवानाञ्च सदाशिवः ।
आधारशक्तिः शक्तीनां मृत्युञ्जय नमोऽस्तु ते ।१७।
सोमसूर्याग्निमध्यस्थ व्योमव्यापिन् सदाशिव !
कालप्रद महाकाल मृत्युञ्जय नमोऽस्तु ते ।१८।
प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजते जगत् ।
सृष्टिरूपेण देवेश मृत्युञ्जय नमोऽस्तु ते ।१९।
व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि ।
प्राणिनां ज्ञानरूपोऽसि मृत्युञ्जय नमोऽस्तु ते २०।
जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः ।
कारणं सर्वतीर्थानां मृत्युञ्जय नमोऽस्तु ते ।२१।
नेता त्वमिन्द्रियाणाञ्च सर्वज्ञानप्रबोधक ।
सांख्ययोगश्च हंसश्च मृत्युञ्जय नमोऽस्तु ते ।२२।
रूपातीतः सुरूपश्च पिण्डश्च पदमेव च ।
चतुर्युगकलाधार ! मृत्युञ्जय नमोऽस्तु ते ।२३।

रेचके वह्निरूपोऽसि सोमरूपोऽसि पूरके ।
कुम्भके शिवरूपोऽसि मृत्युञ्जय नमोऽस्तु ते ।२४।
क्षयंकरोऽसि पापानां पुण्यानामपि वर्द्धनः ।
हेतस्त्वं श्रेयसां नित्यं मृत्युञ्जय नमोऽस्तु ते ।२५।
सर्वमायाकलातीत ! सर्वेन्द्रियपरावर ।
सर्वेन्द्रियकलाधीश ! मृत्युञ्जय नमोऽस्तु ते ।२६।
रूपं गन्धो रसः स्पर्शः शब्दसंस्कार एव च ।
त्वत्तः प्रकाश एतेषां मृत्युञ्जय नमोऽस्तु ते ।२७।
चतुर्विधानां सृष्टीनां हेतुत्वं कारणेश्वर ।
भावाभावपरिच्छिन्न मृत्युञ्जय नमोऽस्तु ते ।२८।
त्वमेको निष्कलो लोक सकलं भुवनत्रयं ।
अतिसूक्ष्मातिरूपस्त्वं मृत्युञ्जय नमोऽस्तु ते ।२९।
त्वं प्रबोधस्त्वमाधारस्त्वदबीजं भुवनत्रयम् ।
सत्वं रजस्तमस्त्वं हि मृत्युञ्जय नमोऽस्तु ते ।३०।
त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः ।
अष्टत्रिंशत्कलानाथ मृत्युंजय नमोऽस्तु ते ।३१।
सर्वेन्द्रियाणामाधार ! सर्वभूतगुहाशय !
सर्वेऽज्ञानमयानन्त मृत्युञ्जय नमोऽस्तु ते ।३२।
त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः ।
सर्वानन्दमयाधार ! मृत्युञ्जय नमोऽस्तु ते ।३३।

त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिर्बोधलक्षणा ।
शब्दब्रह्म त्वमोङ्कारो मृत्युञ्जय नमोऽस्तु ते ।३४।

श्रीसदाशिव उवाच

एवं संकीर्तयेद्यस्तु शुचिस्तद्गतमानसः ।
भक्त्या शृणोति यो ब्रह्मन् न स मृत्युवशो भवेत् ।३५।
न तु मृत्युभयं तस्य प्राप्तकालं च लंघयेत् ।
अपमृत्युभवं तस्य प्रणश्यति न संशयः ।३६।
व्याधयो नो प्रपद्यन्ते नोपसर्गभयं क्वचित् ।
प्रत्यासन्नान्तरे काले शतैकावर्तने कृते ।३७।
मृत्युर्न जायते तस्य रोगान्मुञ्चति निश्चितम् ।
पञ्चम्यां वा दशम्यां वा पौर्णमास्यामथापि वा ।३८।
शतमावर्तयेद्यस्तु शतवर्षं स जीवति ।
तेजस्वी बलसम्पन्नो लभते श्रियमुत्तमाम् ।३९।
त्रिविधं नाशयेत्पापं मनोवाक्कायसम्भवम् ।
अभिचाराणि सर्वाणि कर्माण्याथर्वणानि च ।।
क्षीयन्ते नात्र सन्देहो दुःस्वप्नं च विनश्यति ।४०।
इदं रहस्यं परमं देवदेवस्य शूलिनः ।
दुःखप्रणाशनं पुण्यं सर्वविघ्नविनाशनम् ।४१।
इति श्रीब्रह्मसंवादे श्रीमहामृत्युञ्जयस्तोत्रं सम्पूर्णम् ।

ॐ

अविवाहितानां पुरुषाणां कृते विवाहार्थमनुष्ठानम्

विनियोगः—ओं पत्नीं मनोरमां देहीति मन्त्रस्य विष्णुर्ऋषिरनुष्टुप् छन्दो महालक्ष्मीर्देवता नवार्णमन्त्रःशक्तिः मन्त्रोदिता देवीबीजं सप्तशती मन्त्रस्तत्वं अशेषविघ्ननिवृत्तिपूर्वक पत्नी प्राप्त्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः— विष्णुऋषये नमः शिरसि । अनुष्टुप् छन्दसे नमः शिखायाम् । महालक्ष्मीर्देवतायै नमो हृदि । नवार्णमन्त्र शक्तये नमो गुह्ये । मन्त्रोदिता देवी बीजाय नमः पादयोः । सप्तशती मन्त्रतत्वाय नमो नाभौ । बीजाय पत्नी प्राप्त्यर्थे विनियोगाय नम सर्वाङ्गे ।

करन्यास—ओं क्लीं पत्नीम् अङ्गुष्ठाभ्यां नमः । ओं क्लीं मनोरमां देहीति तर्जनीभ्यां नमः । ओं क्लीं मनोवृत्तानुसारिणीं मध्यमाभ्यां नमः । ओं क्लीं तारिणीम् अनामिकाभ्यां नमः । ओं क्लीं दुर्गसंसारसागरस्य कनिष्ठिकाभ्यां नमः । ओं क्लीं कुलोद्भवां करतललर पृष्ठाभ्यां नमः ।

अथ हृदयादिन्यास— ओं क्लीं पत्नीं हृदयाय नमः । ओं क्लीं मनोरमां देहि शिरसे स्वाहा । ओं क्ली मनोवृत्तानुसारिणीं शिखायै वषट् । ओं क्लीं तारिणीं कवचाय हुम् । ओं क्लीं दुर्गसंसारसागरस्य नेत्रत्रयाय बौषट् । ओं क्लीं कुलोद्भवाम अस्त्राय फट् ।

मन्त्रोद्धारः— ओं ऐं ह्रीं क्लीं पत्नीं मनोरमां देहि मनोवृत्तानु-

सारिणीम् तारणीं दुर्गसंसारसागरस्य कुलोद्भवाम् । क्लीं ह्रीं ऐं उों ।। प्रत्यहं सहस्र संख्यात्मको जपः १००० मंगल-दिनान्तम् (अर्थात् विवाह प्रारम्भिक शकुनग्रहण दिनान्तम् नवग्रहशान्ति दिनान्तम् वा) जपेत् ।

ध्यानम्:— शाकम्भरी नीलवर्णा नीलोत्पल विलोचना ।
गम्भीर नाभिस्त्रिवली विभूषित तनूदरी ।।

सुकर्कश मनोतुंग वृत्तपीन घनस्तनी ।
मुष्टिः शिलीमुखैः पूर्णा कमलं कमलालया ।।

पुष्पपल्लव मूलादि फलाद्य शाक सम्भवम् ।
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युभयापहम् ।।

कार्मुकं च स्फुरत्कान्तिर्बिभर्त्ति परमेश्वरी ।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्त्तिता ।।

उमागौरी सतीचण्डी कालिका सापि पार्वती ।
शाकम्भरीं स्तुवन्ध्यायञ्जपन्सम्पूजयन्नमन् ।।
अक्षय्यमश्नुते नित्यमन्नपानामृतादिवम् ।

इति ध्यानम्

सवत् १९७२कार्तिक प्रविष्टे ८ पण्डित अनिरुद्ध शर्म्मकेसरेण हंसाली (कटरा श्रीवैष्णवदेवीद्वार) बासिना लिखितम ।।

तृचाकल्पनमस्कार

(लेखक—डा० श्रीवासुदेवकृष्णजी चतुर्वेदी, डी० लिट्०)

कल्याण प्रेस गोरखपुर से साभार उद्धृत

श्रीसूर्यनारायण भगवान्के प्रीति-हेतु तृचाकल्प-नमस्कार वैदिक मन्त्र और तन्त्राक्षर (बीजों) से संयुक्त ब्रह्मकर्म-समुच्चय में उपलब्ध है ।

विधि—आसनपर बैठकर आचमन कर प्राणायाम करे; पुनः हाथ में जल लेकर संकल्प । संकल्पमें देशकालपात्र-तिथि वारादिका उच्चारणकर कहे—

'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीसवितृसूर्यनारायणप्रीत्यर्थं च तृचाकल्पविधिना नमस्काराख्यं कर्माहं करिष्ये ।'

इस प्रकार संकल्प कर जल छोड़ दे ।

पुनः एक पात्रमें जल भरकर उसमें गन्ध-पुष्प अक्षत रख दे। तदनन्तर हाथमें पुष्प लेकर श्रीसूर्यनारायण का ध्यान करे। ध्यान का मन्त्र यह है—

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ।।

इस प्रकार ध्यान कर निम्नोक्त मन्त्रों का उच्चारण करते हुये नमस्कार करे ।

ॐ ह्रां उद्यन्नद्य मित्रमहः ह्राँ ॐ मित्राय नमः ॥
ॐ ह्रीं आरोहन्नुत्तरां दिवम् ह्रीं ॐ रवये नमः ॥
ॐ ह्रूं हृद्रोगं मम सूर्य ह्रूं ॐ सूर्याय नमः ॥
ॐ ह्रैं हरिमाणं च नाशय ह्रैं ॐ भानवे नमः ॥
ॐ ह्रौं शुकेषु मे हरिमाणं ह्रौं ॐ खगाय नमः ॥
ॐ ह्रः रोपणाकासु दध्मसि ह्रः ॐ पूष्णे नमः ॥
ॐह्रां अथो हारिद्रवेषु मे ह्रां ॐहिरण्यगर्भाय नमः ॥
ॐ ह्रीं हरिमाणं नि दध्मसि ह्रीं ॐमरीचये नमः ॥
ॐ ह्रूं उदगादयमादित्यः ह्रूं ॐ आदित्याय नमः ॥
ॐ ह्रैं विश्वेन सहसा सह ह्रैं ॐ सवित्रे नमः ॥
ॐ ह्रौं द्विषंतं मह्यं रन्धयन् ह्रौं ॐ अर्काय नमः ॥
ॐ ह्रः मो अहं द्विषते रथं ह्रः ॐभास्कराय नमः ॥
ॐ ह्रां ह्रीं उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं
ह्रां ह्रीं ॐ मित्ररविभ्याँ नमः ॥

ॐ ह्रूं हैं हृद्रोगं मम सूर्य हरिमाणं च नाशय
ह्रूं हैं ॐ सूर्यभानुभ्याँ नमः ॥

ॐ ह्रौं ह्रः शुकेषु मे हरिमाणं रोपणाकासु दध्मसि
ह्रौं ह्रः ॐ खगपूषाभ्यां नमः ॥

ॐ ह्राँ ह्रीं अथो हरिद्रवेषु ये हरिमाणं नि दध्मसि

ह्रां ह्रीं ॐहिरण्यगर्भमरीचिभ्याँ नमः ॥

ॐ ह्रूं ह्रैं उदगादयमादित्यो विश्वेन सहसा सह
ह्रूं ह्रैं ॐ आदित्यसवितृभ्यां नमः ॥

ओं ह्रौं ह्रः द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते
रथं ह्रौं ह्रः ओं अर्कभास्कराभ्यां नमः ॥

ओं ह्राँ ह्रीं ह्रूं ह्रैं उद्यन्नद्य मित्रमह आरोहन्नुत्तराँ
दिवं हृद्रोगं मम सूर्य हरिमाणं च नाशय ह्रां ह्रीं ह्रूं
ह्रूं ह्रैं ओं मित्ररविसूर्यभानुभ्यो नमः ॥

ओं ह्रौं ह्रः ह्रां ह्रीं शुकेषु मे हरिमाणं रोपणाकासु
दध्मसि अथो हरिद्रवेषु मे हरिमाणं नि दध्मसि
ह्रौं ह्रः ह्राँ ह्रीं ओं खगपूषहिरण्यगर्भमरीचिभ्यो नमः ॥

ओं ह्रूं ह्रैं ह्रौं ह्रः उदगादयमादित्यो विश्वेन
सहसा सह । द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रथं
ह्रूं ह्रैं ह्रौं ह्रः ओं आदित्यसवित्रर्कभास्करेभ्यो नमः ॥

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् । हृद्रोगं मम
सूर्य हरिमाणं च नाशय ॥ शुकेषु मे हरिमाणं
रोपणाकासु दध्मसि । अथो हारिद्रवेषु मे हरिमाणं

नि दध्मसि । उदगादयमादित्यो विश्वेन सहसा सह । द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रथम् ॥ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्क-भास्करेभ्यो नमः । इस मन्त्र की तीन बार आवृत्ति करनी चाहिये ।

विनतातनयो देवः कर्मसाक्षी सुरेश्वरः ।
सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु ॥
आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥
नमो धर्मविधानाय नमस्ते कर्मसाक्षिणे ।
नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥

जो आदित्यको प्रतिदिन नमस्कार करते हैं, उन्हें सहस्रों जन्मतक दरिद्रताका क्लेश नहीं होता ।

अनेन तृचाकल्पनमस्काराख्येन कर्मणा भगवान् श्रीसवितृसूर्यनारायणः प्रीयतां न मम ।

(इस तृचा - कल्प-नपस्कार कर्म से भगवान् सवितृ सूर्यनारायण प्रसन्न होवें ।)

इति तृचाकल्पनमस्काराः ॥

मुद्रकः—श्रीवैष्णवी प्रिंटिंग प्रेस, सेहदड़ा जम्मू (तवी)